ISSN 2583-9020

An Electronic Veda Journal

# वेद वाणी

(vEda vaaNee)

Volume 2, Issue 2, July 2024



Printed and Published by

**Veda Samskruti Samiti**

Malkajgiri

Hyderabad TS

# मत्तविलासप्रहसनस्य साहित्यशास्त्रीया समीक्षा – द्वितीयो भागः

[Literary Study of Mattavilāsaprahasana – A Comedy – Part 2]

**Kamakshi Ramanarayanan**

Arudhra Education and Research Foundation, Lingi Chetty Street, Mannady, Chennai
arudhraresearchfoundation@gmail.com

**Summary**

Mattavilāsaprahasana is a single-act comedy composed by the Pallava king Mahendra Vikrama Varma ($6^{th}$ – $7^{th}$ century CE), set in the streets of Kāñcīpura. Its plot revolves around the uncouth and hypocritical interactions between a *kāpālika* (a ritualistic person carrying a human skull), Buddhist monk, and other rather less-cultured characters. This is an attempt to study the *prahasana* (comedy) from the perspective of a few aspects of *sāhitya śāstra* (rules for literary works). The elements of plot and analysis of characters were dealt with in part one. The second part discusses *rasa* (sentiment), *aucitya* (decorum), *alaṅkāras* (poetic embellishments), and possible influence of the vernacular. The Part-1 of the three-part series has been published in the Veda VaNee, 2(2): 13 – 22, 2024.

अथेदीनां मत्तविलासप्रहसनस्य रसपरिपाकः, औचित्यम्, अलंकारसौष्ठवं च पर्यालोच्यन्ते।

## I. रसविमर्शः

### i. अङ्गी रसः

रूपकेऽस्मिन् हास्यः प्राधानो रसः, हासस्य अविच्छिन्नस्थायितया[1] सहृदयानुभवसिद्धत्वात्।

### ii. प्रहसनाङ्गानि

रसार्णवसुधाकरस्य[2] तृतीयविलासे शिङ्गभूपालेन प्रपञ्चितानां प्रहसनाङ्गानां[3] समन्वयः क्रियते।

a) *“कथं मद्यदोषो मामेवं सङ्क्रामयति। भवतु भवतु। अद्यप्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि ”[६]* इत्यत्र कपाली पूर्वं गृहीतं सुरापानमहाव्रतं तत्पानमोहवशादेव त्यक्तुमुद्युङ्क्ते, इति **अवगलितम्**[4]।

[1] “विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः। आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः॥” (दशरूपकम् ४।३४)। इतः परं दशरूपकं ‘दश’ इति परिभाषया निर्दिश्यते।

[2] रसार्णवसुधाकरो ‘रसा’ इति परिभाषया निर्दिश्यते।

[3] “अवगलितावस्कन्दौ व्यवहारो विप्रलम्भ उपपत्तिः। भयम् अनृतं विभ्रान्तिर्गद्गदवाक् च प्रलापश्च॥” (रसा ३।२७६)

[4] “पूर्वम् आत्मगृहीतस्य समाचारस्य मोहतः। दूषणं त्यजनं चात्र द्विधावगलितं मतम्॥” (रसा ३।२७७)

b) *“पेया सुरा प्रियतमामुखम् ईक्षितव्यम्...” [७]* इत्यादिना परमार्थेनायोग्यस्यापि स्वमतस्य मोक्षसाधनत्वेन स्तुत्या **अनृतम्**[5]।

c) कपालिना *“येन मम पान-भोजनशयनेषु नितान्तम् उपकृतं शुचिना” [११]* इत्यत्र क्षुद्रस्य कपालस्य शुचित्वोपकारकत्वाभ्यां विशेषणाभ्यां योग्यतावर्णनात् **प्रलापः**[6]।

d) *“किमत्र द्रष्टव्यम्। भिक्षाभाजनं खल्वेतत्” [१४]* इति शाक्यभिक्षुणा प्रोक्ते,*“अत एव द्रष्टुमिच्छामि” [१४]* इत्यादेः कपालिकर्तृकाद् हठादारभ्य तयोर्हास्यकरसंवादाद् **व्यवहारः**[7]।

e) *“उन्मत्तक इति बहुश एतं शब्दं शृणोमि। एतद्गृहीत्वा दर्शय उन्मत्तकम्” [२८]* इति उन्मत्तकदिदृक्षुणा उन्मत्तकेन कापालिकाय कपाले दत्ते सति *“अयम् इदानीं कुड्येनान्तर्हितः! शीघ्रम् अनुगम्यताम्” [२८]* इति लब्धावसरेण कापालिकेनोन्मत्तकस्य वञ्चनाद् **विप्रलम्भः**[8]।

f) *“अवश्यम् एतैर्दुष्टबुद्धस्थविरै-र्निरुत्साहैरस्माकं तरुणजनानां मत्सरेण पिटकपुस्तेकषु स्त्री-सुरापानविधानानि परामृष्टानीति तर्कयामि” [१२]* इत्यत्र बौद्धभिक्षूणां प्रसिद्धस्य मदिरामहिलानिषेधस्य, मत्सरबौद्धस्थविरकृतविधिवाक्याप-मार्जनम् इति लोकसिद्धेन कल्पितहेतुना साध्यमानत्वाद् **उपपत्तिः**[9]। यथा वा *“अर्हं बुद्धस्य विज्ञानं, येन मुण्डनं दृष्टम्” [१८]* इति बौद्धे प्रसिद्धस्य मुण्डनधर्मस्य केशाकेशिकलहात् सुखमोक्षफलकत्वमिति लोक-सिद्धेनार्थेन समर्थनाद् **उपपत्तिः**।

g) *“अहो सुखोपनतोऽभ्युदयः। एतावान् दोषः – महाजनो द्रक्ष्यति” [१६]* इत्यादौ शाक्यभिक्षोः शिष्टजन-दर्शनभयात् स्वदुराचारान्निवृत्तिरिति **भयम्**[10]।

**iii. रसान्तराणां शोभा**

a) रसभावान्तराण्यपि कथायामस्यां विप्रकीर्णानि यथोचितमभ्युद्यन्ति। उदाहरणानि यथा

- *“निर्विष्टोज्झितचित्रचीवरधरो रूक्षैर्नितान्ताकुलैः केशैरुद्धत-*

[5] “तदेवानृतमित्याहुरपरे स्वमतस्तुतेः” (रसा ३।२८२)

[6] “प्रलापः स्यादयोग्यस्य योग्यत्वेनानुमोदनम्” (रसा ३।२८३)

[7] “व्यवहारस्तु संवादो द्वित्राणां हास्यकारणम्” (रसा ३।२७९)

[8] “विप्रलम्भो वञ्चना स्याद्भूतावेशादिकैतवात्” (रसा ३।२७९)

[9] “उपपत्तिस्तु सा प्रोक्ता यत् प्रसिद्धस्य वस्तुनः।
लोकप्रसिद्धया युक्त्या साधनं हास्यहेतुना॥” (रसा ३।२८०)

[10] “स्मृतं भयं तु नगरशोधकादिकृतो दरः” (रसा ३।२८१)

*भस्मपांसुनिचयैर्निर्माल्यमालाकुलैः। उच्छिष्टाशनलोलुपैर्बलिभुजाम् अन्वास्यमानो गणैर्भूयान् ग्राम-कसारसञ्चय इव भ्राम्यन् मनुष्याकृतिः" [२६]* इत्यत्रोन्मत्तक-विभावकः तज्जुगुप्सितचेष्टाद्युद्दीपितः पाशुपतनिष्ठो **बीभत्सः**[11] समुज्जृम्भते।

- *"भगवन्! परिभ्रमति परिभ्रमति पृथिवी। पुरः पतामीव। अवलम्बस्वेदानीं माम्" [५]* इति क्षीबत्वेन देवसोमायाः स्खलितगत्या, *"प्रिये सोमदेवे! किं त्वं कुपितासि... सुलभपदस्खलितो मे मदोऽयं तवापराद्धः" [६]* इति कपालिनः स्खलितगिरा च पानहेतुको **मदाख्य**भावो[12] व्यज्यते।
- *"चिरं मया चरितमखण्डितं तपः ... त्वमद्य यत् कुशलि कपालि दृश्यसे॥" [२९]*

इत्यत्र नष्टकपालस्य पुनर्लाभेन कपालिनश्चित्तप्रसादस्य दर्शनाद् **हर्ष** इति भावः[13]।

**b)** मध्ये मध्ये लक्ष्यमाणो रत्यादीनामाविर्भावस्तु विद्युत्कल्पः। न हि ईदृशानां रत्यादीनां साक्षाद्रसत्वं किंतु तदाभासमात्रत्वम् अलङ्कारत्वं च। तेषां वारुणीवश्य-वामाचरणशीलपात्रनिष्ठत्वाद्, हास्यरसाङ्गतया गौणतापन्नत्वाच्च। यथा

- *"सत्यमेवैतत् – तपसा कामरूपता प्राप्यत इति" [५]* इत्यादिना कपालिवचनेन व्यक्ती कृतो देवसोमाविषयकानुरागो वक्तुर्मदिरामदाक्रान्तत्वात् स्वयं रसपदमनारूढो **रसाभासत्वं** प्राप्नोति। तस्य च हास्याङ्गत्वेन **ऊर्जस्वी**ति[14] अलङ्कारः।
- *"इदानीं तव शिरःकपालं मम भिक्षाकपालं भविष्यति" [१८]*

इत्यत्र कपालिनो रुष्टभाषणपूर्वके शाक्यभिक्षुप्रहरणाद्युद्यमे **क्रोधा-भासस्य हास्याङ्गत्वम्**।

- कपालिना बहुधा पीडितेन शाक्यभिक्षुणा अनन्यगत्या निजभिक्षाभाजने प्रदर्शिते, *"हा हतास्मि मन्दभागा। सर्वलक्षण-सम्पन्नतया कमलासनशीर्षकपाला-नुभावस्य पौर्णमासी-सोमदर्शनस्य*

---

[11] "बीभत्सः कृमिपूतिगन्धिवमथुप्रायैर्जुगुप्सैकभू-रुद्वेगी रुधिरान्त्रकीकसवसामांसादिभिः क्षोभणः। वैराग्याज्जघनस्तनादिषु घृणाशुद्धोऽनुभावैर्वृतो नासावक्त्रविकूणनादिभिरिहावेगार्तिशङ्कादयः॥" (दश ४।७३)।

[12] "हर्षोत्कर्षो मदः पानात्स्खलदङ्गवचोगतिः" (दश ४।२१)

[13] "प्रसत्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः" (दश ४।१४)

[14] "अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभासश्चेत्युच्यते। स यत्रापरस्याङ्गं तदूर्जस्वि" इति कुवलयानन्दे रसवदाद्यलङ्कारकारिकावृत्तौ। (कुवलयानन्दः १७०)। इतः प्रभृति कुवलयानन्दः 'कु' इति निर्दिश्यते।

*नित्यसुरागन्धिन एतस्य मलिनपट-संसर्गेणेयमीदृश्यवस्था संवृत्ता" [२२]* इति देवसोमा**शोकस्य आभासत्वं हास्याङ्गत्वं** च, तस्य वारुणी-विभ्रान्तपात्रनिष्ठत्वात्।

## II. औचित्यपर्यालोचना

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा॥"

इति[15] सुप्रतिष्ठापितं हि ध्वनिकारेणौचित्यस्य काव्यप्राणायमानत्वम्। इदं च प्रहसनं नीचपात्रपूरितमपि, काव्यजीवातोरौचित्यस्य निधानम् इति प्रदर्शयिष्यते। सुरापानं, पात्राणां परस्परवागुपालम्भपूर्वकः शारीरिकाभिघातः, कूहनागर्भितव्यवहार इत्येतादृशम् असभ्याचरणमपि रूपकेणानेन सभारञ्जकताम् अनायीति प्रशंसनीयः कविः।

**i.** प्रहसनमिदं स्वाङ्गिनं हास्यरसं सर्वांशेन व्यञ्जयत् प्रतिपदं परमम् औचित्यम् आवहत्येव। एतद्यथा

**a)** भूमौ पतितां देवसोमां निजकरार्पणेनोद्धरन्तं शाक्यभिक्षुं वीक्ष्य कपालिनः परिवादघोषः *"दुष्टभिक्षुनामधारकेण नागसेनेन मम प्रियतमापाणिग्रहणं क्रियमाणम्" [१८]* इति। विवाहार्थरूढस्य पाणिग्रहणपदस्य प्रयोगो हास्यम् अभिव्यनक्तीति पदकृतौचित्येन वर्धते काव्यशोभा।

**b)** यथा वा विवादपरिहारार्थम् अधिकरणे गन्तव्ये कपालिनः प्रतिज्ञा*"कुतश्चिदपि न्याय्यवृत्तेर्भयं नास्ति" [१४]* इति। अनवरतं मदिरापारावारे परिप्लवमानस्य शुष्कवाक्कलहपङ्किले च संलग्नस्य कापालिकस्य न्याय्यवृत्तिविषयकं भाषणं हास्यास्पदमेव; तस्य वचनाचारयोरन्योन्याननुगुणत्वेऽपि स्वस्य तयोरानुगुण्यभ्रान्त्या। एवं सामान्यतोऽसङ्गतमपि वस्तु रसपोषकत्वेन औचित्यं संप्राप्य काव्यविच्छित्तिमातनोति।

**ii.** अपि च साहित्यशास्त्रीयग्रन्थेषु प्रायशः काव्यदोषतया गण्यमाना अप्यंशाः कवेर्महेन्द्रविक्रमस्य कौशलाद्गुणायन्ते, प्रकृतप्रहसनस्योत्कर्षहेतुत्वात्। एतादृशं दोषाणां गुणविपरिणामशाल्यौचित्यं प्रमुखतया द्विविधं दृश्यतेऽत्र– वक्तृवैशिष्ट्यप्रयुक्तम् अलङ्कारगतं चेति। तत्रादिमं यथा

**a)** *"ते खलु मिथ्यादृष्टयः"* इत्यारभ्य *"स्वेनैव वाक्येन हता वराकाः" [७]* इति यावता वाक्येनार्हतः समुपालभ्य, पुनरपि *"न खलु ते पापा आक्षेपमुखेनाप्यभिधातुमर्हन्ति"*

---

[15] ध्वन्यालोकः-३ (p. ३३०)

इति स्वस्यैव पूर्ववाक्यार्थं प्रत्याचक्षाणस्य कापालिकस्य प्रायश्चित्तस्मारणच्छलेन वचनं *"कुतीर्थसङ्कीर्तनोपहतां जिह्वां सुरया प्रक्षालयितुमिच्छामि"* [७] इति। निन्दनार्थमपि पापिनां नामग्रहणं पापायैवेत्यस्य परमोत्तमस्य[16] धर्मस्यातिक्रमणे कपालिकृतं यत् प्रायश्चित्तज्ञापनं, तद् वस्तुतः सुरापानविधानार्थम्। पापस्यैकस्य परिमार्जनाय ततोऽपि गुरुतरं पापान्तरं परिहारविधयोच्यत इत्येतद्वैषम्यं नात्र दोषाय। परं, धूर्ताचरणैकशीलस्य कपालिनो मुखोद्गतत्वेन वक्तृवैशिष्ट्यादङ्गिनो हास्यरसस्य पोषणायैव।

b) निजभिक्षाभाजनम् अपश्यतः सुरां स्वीचिकीर्षोः कपालिनो वचांसि *"आपद्धर्मं प्रमाणीकृत्य गोशृङ्गेण प्रतिगृह्यताम्"* [१०] इति। अत्र, वारुणीपानरूपे कुत्सितेऽपि कार्ये कर्तव्ये तदङ्गतयापद्धर्मः स्मर्यते, इत्येवंरूपा कापालिकनिष्ठा धर्मलोपभीतिः सुहासकरा।

c) सुरापणमेत्य कपालिना *"मिथ्या त्रिलोचनविलोचनपावकेन"* इत्यादिना हरनेत्राग्निना स्नेहभावम् आपन्नायाः कामदेवमूर्तेः वारुण्याश्च अभेदकथने, तत्समर्थनविधया देवसोमायाः प्रत्युक्तिः *"नहि लोकोपकारनिरतो लोकनाथो लोकं विनाशयति"* [९] इति। अत्र जगदीश्वरः परमकारुणिकः इति नितराम् उत्कृष्टस्याप्यर्थस्य सुरापान-वशंगतेन पात्रेण उपन्यस्तत्वादङ्गी हास्यरसः परिपुष्यते।

d) शाक्यभिक्षुणा *"इदानीमपि नास्ति ते करुणा"* इति सकरुणं याचितस्य, तेन सह कलहवर्धने बद्धकङ्कणस्य कपालिनः प्रतिवचनं *"यद्यस्ति करुणा, कथं वीतरागो भविष्यामि"* [१६] इति। वीतरागत्वमिति स्थितप्रज्ञधर्मभूतस्यात्मगुणस्य[17] कपालिना निजदयाराहित्यं समर्थयितुम् उपादानं हास्यास्पदमेव। प्रसङ्गेऽस्मिन्नस्य खलवदनपतितस्यार्थस्य वेदान्ताभासमात्रत्वात्।

e) यथा च शाक्यभिक्षुभिक्षाभाजनस्य स्वत्त्वभ्रान्त्या महति शोके निमग्नस्य कपालिनः स्वयं तस्य कपालस्य शुद्धीभावे विश्वासव्यञ्जकं वचनम्

---

16 "आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥" इति स्मरणात्। स्मृतिरियं भट्टोजिदीक्षितैः सिद्धान्तकौमुद्याम् "अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" (३।१।१०१) इति पाणिनीयसूत्रस्य वृत्तावाम्नाता।

17 "वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते" (भगवद्गीता २।५६)

*“श्रूयन्ते हि महान्ति भूतानि प्रायश्चित्तैरपनीतकल्मषाणि भवन्ति” [२२]* इति। अत्र प्रायश्चित्तमहिमेति प्रौढार्थो मत्तकापालिकेन विपरीततया गृहीतो निजविवक्षायाः समर्थनाय स्वच्छन्दम् अस्थाने आनीतो हास्यमेव व्यनक्ति।

**iii.** तत्रालङ्कारगतम् औचित्यं निरूप्यते। यथा

**a)** काञ्चीनगर्याः सौन्दर्यवर्णनावसरे देवसोमाया वाक्यम् *“भगवती वारुणीवानवगीतमधुरा काञ्ची” [८]* इति। इह वारुणीकाञ्चीपुर्योः अनवद्यमाधुर्यरूपसमानधर्मेण इव-शब्दोपात्तसादृश्यस्य वचनात् पूर्णोपमा। न चात्र सुरापेक्षया काञ्चीपुरस्य ज्यायस्त्वादधिकोपमं[18] दोषाय भवेत्। वाक्यस्यास्य मत्तावदनतः समुद्भूतत्वात्। प्रत्युत, पात्रानुगुणत्वादस्या मत्तभाषणम् उपस्कुर्वत्या अधिकोपमया हास्यरस एव प्रकामं शोभते।[19]

**b)** अनन्यगत्या निजनिरपराधितां निरूपयितुं शाक्यभिक्षुणा स्वभिक्षापात्रे कपालिनः सन्निधौ प्रकाशिते देवसोमाया विलापः – *“सर्वलक्षणसम्पन्नतया कमलासन-शीर्षकपालानुभावस्य … एतस्य … मलिनपटसंसर्गेणेदृश्यवस्था संवृत्ता” [२२]* इति। अत्र ब्रह्मकपालस्यानुभाव इवानुभावो यस्येत्यर्थे प्रकृतकपाल-ब्रह्मकपालयोरिवशब्दं विना सादृश्योक्त्या वाचकलुप्तोपमा। इहाप्युपमानस्योपमेयापेक्षया गुणाधिक्येन यदधिकोपमं तन्न दोषाय। परं पूर्ववद्धास्यरसस्य उत्कर्षकतया गुणायैव भवति।

इत्थं, प्रहसनेऽस्मिन्ननौचित्यलेशोऽपि नास्त्येव। अथवा, शृङ्गारकरुणादि-रसापेक्षया यद्यदनौचित्यं मतं, तदत्र प्रहसने न दूषणं किन्तु भूषणमेव। उक्तं ह्यभिनवगुप्तपादैः “अनौचित्यप्रवृत्ति-कृतमेव हि हास्यविभावत्वम्। तच्चानौचित्यं सर्वरसानां विभावा-नुभावादौ संभाव्यते” इति[20]।

## III. अलङ्कारसमीक्षा

विविधैरर्थालङ्कारैः समुपस्कृतमिदं प्रहसनं कविराजस्य महेन्द्रविक्रमस्य नवनवोन्मेषशालित्वं निःसंशयं संस्थापयति।

---

[18] “यत्रोपमानमधिकं तद्भवेदधिकोपमम्” इति प्रतापरुद्रियस्य दोषप्रकरणे कारिका। (प्रतापरुद्रीयम् ९)

[19] मृच्छकटिके शकारस्य जल्पनवत्। “किं द्रौपदीव पलायसे रामभीता। एष हरामि सहसेति यथा हनूमान् विश्वावसोर्भगिनीमिव तां सुभद्राम्॥” इति। (१।२५)

[20] अभिनवभारती (६।३८ p. ६९५)

तत्रालङ्काराणां प्राचुर्यात् केचनैवेहोदहारणतया समुल्लिख्यन्ते।

i. सश्रद्धसुरासेवनेन संपादितस्य देवसोमाङ्गसौष्ठवस्य कपालिकर्तृको वर्णनोपक्रमः *"त्वया परमव्रतस्य विधिवदनुष्ठानेनान्य एव रूपातिशयः क्षणात् प्रतिपन्नः" [५]* इति। अन्यशब्देन देवसोमासौन्दर्यातिशयस्य सर्ववैलक्षण्य-वर्णनादत्र **भेदकातिशयोक्तिः**[21]।

ii. कपालिकर्तृकं सुरापणवर्णनम्
*"एष सुरापणो यज्ञवाटविभूतिम् अनुकरोति। अत्र हि ध्वजस्तम्भो यूपः सुरा सोमः शौण्डा ऋत्विजश्चषकाश्चमसाः शूल्यमांसप्रभृतय उपदंशा हविर्विशेषा मत्तवचनानि यजूंषि गीतानि सामान्युदङ्काः स्रुवास्तर्षोऽग्निः सुरापणाधिपतिर्यजमानः" [८]* इति, देवसोमायाः प्रतिभाषणं च *"आवयोरप्यत्र भिक्षा रुद्रभगो भविष्यति" [९]* इति। सुरापणस्य यज्ञवाटिकानुकरणम् इति सादृश्यवचनाद् **उपमा**[22]। ध्वजस्तम्भादिभिक्षान्तेषु क्रमेण यूपादिरुद्रभगान्तानाम् अभेदारोपेण सिद्धं **रूपकं**[23] चोपमाङ्गतया **सङ्कीर्णम्**। (सुरापणीयद्रव्याणां यज्ञभूमिप्रसिद्ध-यूपादिस्थानीयत्वेन साधारणधर्मता कल्प्यते इति।) ईदृशानां कविप्रतिभायाः अप्रतिहतप्रवाहप्रस्रुतानामारोपारूपाणाम् अचुम्बितार्थानामयत्ननिवेशः प्रशंसनीयः।

iii. कपालिना कृतः सुरायाः स्तवः *"एषा भगवती वारुणी चषकेष्वावर्जिता प्रत्यादेशो मण्डनानाम्, अनुनयः प्रणयकुपितानां, पराक्रमो यौवनस्य, जीवितं विभ्रमाणाम्" [९]* इति। एकेन कपालिना वारुण्याः प्रत्यादेशत्वादिना बहुधोल्लेखाद् **उल्लेखः**[24]। अत्र मण्डनादयः सम्बन्धिनः, यद्भेदप्रयुक्तोऽयम् उल्लेखः।

iv. तत्समनन्तरं च कापालिकस्य वचनम्
*"मिथ्या त्रिलोचनविलोचनपावकेन भस्मीकृतां मदनमूर्तिमुदाहरन्ति।*
*स्नेहात्मिका तदभितापवशाद् विलीना सेयं प्रिये मदयति प्रसभं मनांसि॥" [९]*

इति। हरनेत्राग्नितापकर्तृकं स्नेहात्मकत्वम् इत्यप्रकृतधर्मस्य मदनमूर्तावारोपार्थं पुराणप्रसिद्धोऽपि[25] भस्मीभावात्मकः प्रकृतधर्मो निषिद्ध्यत इत्यपह्नुत्यलङ्कारो मिथ्याशब्देनाविष्क्रियते। मदजनकत्व-

---

[21] "भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम्" (कु ३८)

[22] "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" (कु ६)

[23] "विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्। रूपकम्" (कु १७)

[24] "एकेन बहुधोऽल्लेखोऽप्यसौ विषयभेदतः" (कु २३)

[25] "तृतीयात्तस्य नेत्राद्वै निस्ससार ततो महान्॥१४ ... जज्वालोर्ध्वशिखो दीप्तः प्रलयाग्निसमप्रभः॥१५ ... भस्मसात्कृतवान्साधो मदनं तावदेव हि" इति श्रीशिवमहापुराणे रुद्रसंहितायां पार्वतीखण्डे कामनाशवर्णाख्याध्याये नारदं प्रति ब्रह्मणो वचः। (२।३।१९)

साधारण्येन वारुण्याः कामदेवमूर्तेश्च अभेदोपादानम् इति युक्तिरपह्नवस्य बीजमिति **हेत्वपह्नतिः**[26]।

v. देवसोमया समर्पितां सुरां मनसा वाञ्छन्तमपि वचसा प्रत्याचक्षाणं स्वसृक्क्वणीम् आलिह्य तिष्ठन्तं शाक्यभिक्षुम् उद्दिश्य कापालिकस्य उपहासवचांसि *"इयमस्येच्छाविरोधिनी वाङ्मुखप्रसेकेन स्खलति"* *[१६]* इति। इच्छाविरोधिन्यां वाचि मुखप्रसेकत्वस्य तृतीयाविभक्त्युपात्तेनाभेदेनारोपात्[27], कैतवादिपदप्रयोगाभावेऽपि स्खलतीति शब्दसमार्थ्यादत्र गम्या **कैतवापह्नतिः**[28]। प्रसेकत्वारोपबलेन च वाक्त्वरूपधर्मस्य निह्नवो प्रतीयते। अत्र परमार्थतः सुरां सिस्वादिषमाणेनापि शाक्यभिक्षुणा लोकापवादभीरुणा यत्नाच्छादितमपि स्वान्तर्वर्तिनं मनोरथं पिशुनयन् निजसृक्वावलेहः, तदुदीरितस्य सुराप्रत्याख्यानस्य मिथ्यात्वं स्फुटं प्रकाशयतीत्यर्थः।

vi. शाक्यभिक्षुणा *"कथं कपालम्"* इति पृष्टस्य कापालिकस्य सावज्ञं प्रतिभाषणम् *"दृष्टानि वस्तूनि महीसमुद्रमहीधरादीनि महान्ति मोहात्।*
*अपह्नवानस्य सुतः कथं त्वमल्पं न निह्नोतुमलं कपालम्"* *[१७]*
इति। इह कारणभूतस्य शून्यवादिनो[29] बुद्धस्य निह्नवशीलतायाः कार्यभूते शाक्यभिक्षौ समुचितत्ववर्णनात् **समालङ्कारः**[30]। मतप्रवर्तकत्वेन बुद्धस्य कारणता, तदनुयायित्वेन शाक्यभिक्षोश्च कार्यता।

vii. पाशुपतेन कृता साधुचरितप्रशंसा *"अजिह्मैः सारगुरुभिः स्थिरैः श्लक्ष्णैः सुजन्मभिः। तैर्धर्मो धार्यते स्तम्भैः प्रासाद इव साधुभिः"* *[२४]* इति। साधूनां स्तम्भसादृश्यस्य इवशब्देन उपादानाद्, बिम्बप्रतिबिम्बभावापन्नयोः धर्मप्रासादयोः धारणम् इति साधारणधर्मस्य च वचनात् पूर्णोपमा। प्रकृताप्रकृतयोः साधुस्तम्भयोः पञ्चभिः अजिह्मत्वादिविशेषणैः प्रत्येकं ऋजुबुद्धित्वाकुटिलत्वादिवाच्यार्थद्वयस्य समर्पणेन **प्रकृताप्रकृतश्लेषः**[31]। स च,

---

[26] "शुद्धापह्नतिरन्यस्यारोपार्थो धर्मनिह्नवः। ... स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नतिः।" (कु २६, २७)

[27] "प्रकृत्यादिभ्य उपसङ्ख्यानम्" इति वार्तिकेन, प्रसेकशब्दाद् अभेदे तृतीया (प्रकृत्यादिगणस्य आकृतिगणत्वात्)। प्रसेकाभिन्ना वागिति। (प्रकृत्यादेराकृतिगणत्वं "कर्तृकरणयोस्तृतीया" २.३.१८ इति सूत्रे तत्त्वबोधिनीव्याख्याने उक्तम्।)

[28] "कैतवापह्नतिर्व्यक्तौ व्याजाद्यैर्निह्नतेः पदैः" (कु ३१)

[29] "इह सर्वभावानां प्रतीत्यसमुत्पन्नत्वात् शून्यत्वं सकलेन शास्त्रेण प्रतिपादितम्" इति प्रसन्नपदाख्या मध्यमकशास्त्रवृत्तिः। (२७।२९)

[30] "सारूप्यमपि कार्यस्य कारणेन समं विदुः" (कु ९२)

[31] "नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः" (कु ६४)

विशेषणानाम् उपमानोपमेयोभयपक्ष-साधारण्येन सादृश्यगमकत्वात्, **पूर्णोपमाङ्गतया सङ्कीर्णः**।

**viii.** कपालिना निजकपाले पुनर्लब्धे पाशुपतस्य स्वगतं भाषणम् *"सत्यमेतद् नास्त्यदोषवतां भयमिति, यदयमद्य भिक्षुर्व्याघ्रमुखात् परिभ्रष्टः" [२९]* इति। उत्तरवाक्येन कलहशील-कापालिकाद्विमोचनमिति शाक्यभिक्षोः व्यापारम् अनुक्त्वा तत्प्रतिबिम्बभूतस्य व्याघ्रमुखात् परिभ्रंशरूपस्य वृत्तान्तस्यैव वर्णनेन **ललितम्**[32] इत्यलङ्कारः। अनपराधिशाक्यभिक्षुचरितात्मकेन उत्तरवाक्यार्थेन विशेषभूतेन, सामान्यभूतस्य *"नास्त्यदोषवतां भयम्"* इति पूर्ववाक्यार्थस्य समर्थनाद् **अर्थान्तरन्यासः**[33]। अस्यार्थान्तरन्यासस्य ललितेन प्रसाधनादनयोः **अङ्गाङ्गिभावः सङ्करश्च**[34]।

## IV. दैशिकभाषायाः प्रभावः

मध्ये मध्येऽस्मिन् प्रहसने यथायोग्यं केचन विशिष्टपदप्रयोगाः क्रियन्ते यैः काञ्चीपुरनिवासिनः कवेरस्य लेखनशैल्यां बाहुल्यात् तमिळभाषावासितत्वेन भाव्यमिति प्रतीयते। अस्य पाण्डित्यं यद्यपि संस्कृते प्राचुर्येण विद्यते, तथापि मातृभाषायाः प्रभावः स्वलेखनेष्वयत्नसम्पन्नो दृश्यते। यथा

**i.** *"ध्वंसस्व" [१६-१८]* इत्यादि निराकारवचनं देवसोमाशाक्यभिक्ष्वोः मुखात् प्रयुक्तं तत्र तत्र दृश्यते। द्रविडभाषया "நாசமாகப் போ"[35] इति दाक्षिणात्यैः पामरजनैः प्रयुज्यमानो-पालम्भोक्तेः साक्षात् संस्कृतच्छायेव परिदृश्यते ध्वंसस्वेति शब्दः।

**ii.** कपालिशाक्यभिक्ष्वोर्व्यवहारस्य विचारणार्थम् अधिकरणं प्रति गन्तव्यमिति पाशुपतेन प्रोक्ते *"यद्येवं नमः कपालाय" [२३]* इति देवसोमाप्रत्युक्तिः *"அப்படியென்றால் கபாலத்திற்கொரு கும்பிடு"*[36] इति द्रविडभाषाव्यवहारस्य प्रतिकृतिरिव भाति। यदुद्दिश्य सोल्लुण्ठो नमस्कारस्तद्वस्तुनः पुनर्दर्शनस्य अत्यन्तासंभवो द्योत्यते। अनेन कपालपुनर्लाभे देवसोमायाः सर्वथा भग्नाशत्वं सूच्यते।

**iii.** अस्मिन्नेव प्रसङ्गे कपालपुनर्दर्शनाभावं शङ्कमानया देवसोमया "एष ... *यथाकामम् अधिकरणकारणिकानां मुखानि पूरयितुं पारयति" [२३]* इति स्वशङ्कासमर्थकं कथनम्, "வாயை

[32] "वर्ण्ये स्याद्वर्ण्यवृत्तान्तप्रतिबिम्बस्य वर्णनम्। ललितम्" (कु १२८)

[33] "उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः" (कु १२२)

[34] "नीरक्षीरन्यायेनास्फुटभेदालङ्कारमेलने सङ्करः" (कु १२०)

[35] "नाशमागप् पो" इति देवनागर्यां लिप्याम्।

[36] "अप्पडियेन्ड्राल् कपालत्तिर्कोरु कुम्बिडु" इति देवनागर्यां लिप्याम्।

அடைத்துவிடுவான்”[37] इति दैशिकभाषाप्रयोगस्य प्रतिबिम्बायते। दानेन जनानां वशीकरणे समर्थोऽयं शाक्यभिक्षुरित्यतः सत्यं जानन्तोऽपि तदर्पितोत्कोचगृध्नवो न्यायाधीशप्रभृतयः पुनस्तत्पक्षपातेन कपालं स्वामिने कापालिकाय न दापयेयुरिति तात्पर्यम्।

अत्र सर्वत्रापि प्रसिद्धस्य लोकवादस्यानुकृत्या **लोकोक्त्यलङ्कारोऽपि**[38] दीक्षितेन्द्रमतमाश्रित्य कथ्यताम्। दैशिक-भाषयानुवासिताः एतादृशवचोविच्छित्तयो विवक्षितं व्यङ्ग्यार्थं यावत्, पठनक्षणमात्रे प्रकाशयन्त्यः रसिकजनमनोरञ्जकत्वेन, विशिष्य दाक्षिणात्यभाषापरिचयवतां च हास्यरसानुभवं वर्धयन्तितराम्।

## V. उपसंहारः

इत्थमिह रूपके प्रहसनाङ्गानि रसान्तराणि च हास्यरसेऽन्तर्भाव्य, तमेव हास्यं प्रत्येकस्मिन्नपि प्रसङ्गे सुदृढतया प्रकाशयति कविः[39]। किं च, प्रहसनस्यास्य परिहास-बाहुल्येऽपि न क्वचिदपि नैरस्यमनुभूयते, सर्वथौचित्यस्य परिपालनात्। तथैव, क्षुद्रतराणां व्यवहारप्रसङ्गेऽपि नवीनकल्पना-प्रभूतैर्नानालङ्कारैः काञ्चीपुरप्रादेशिक-भाषानुवासितैः प्रयोगैश्च प्रहसनमिदं सहृदयहृदयाह्लादको विलसति।

(अग्रिमे लेखे मत्तविलासप्रहसने शास्त्रान्तराणां प्रभावो विचार्यते।)

## VI. सन्दर्भसूची


१) Bhaṭṭojī Dīkṣita, et al. The Siddhânta-Kaumudî with the Tattvabodhini Commentary of Jnânendra Sarasvati and the Subodhinî Commentary of Jayakṛishṇa. India, T. Jâvajî, 1904.

२) Ganapati Sâstrî, T., editor. *The Mattavilâsaprahasana of Srî Mahendravikramavarman.* Government of His Highness the Maharajah of Travancore, 1917.

३) Gayathri, P. R. *मत्तविलासप्रहसनम् – पाठः १ (Tamil Lecture)*. Lectures on Sanskrit texts, https://www.youtube.com/playlist?list=PLhFBbqHpypErQ6jeuYfjtzaoDNCeVLqUB.

४) N., Veezhinathan, editor. *Śrīmad-Bhagavad-Gītā With the Commentary of Śrī Śaṅkara-Bhagavad-Pūjyapāda.* 1st ed., Ādi


[37] “वायै अडैत्तुविडुवान्” इति देवनागर्यां लिप्याम्।

[38] “लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते” (कु १५७)

[39] शृङ्गारकरुणादिरसान्तराणां विभावविकृतिरेव हास्यबीजम् इत्यत एवाभिनवगुप्ताचार्यैर्हास्ये सर्वरससमावेशः संप्रोक्तः “सर्वे रसा हास्येऽन्तर्भूताः” इति। (अभिनवभारती ६।४८ – p. ७३१)

Śaṅkara Advaita Research Centre, 2014.

५) Siva Purana - Part 4 Rudra Samhitha - Parvati Khanda शिव महा पुराणम् - 4 भाग रुद्र संहिता - पार्वती खण्डः: मूल श्लोक सहित हिन्दी अनुवाद. N.p., Kausiki Books, 2022.

६) Śāstri, Pandit Pattābhirāma, editor. *THE DHVANYĀLOKA OF ŚRĪ ĀNANDAVARDHANĀCHĀRYA With the LOCHANA & BALAPRIYA COMMENTARIES*. Jaya Krishna Das Hari Das Gupta Chowkhambā Sanskrit Series Office, 1940

७) Śūdraka, and Tripathi, Rama Shankar. Mahākaviśudrakapranītaṃ Mrçchakatịkam: Ramānāmnyā Saṃskrṭatịkayā rāstṛabhāsạnuvādena bhāvasaṃvalitayāvistrṭabhūmikayā ca samalaṅkrṭam. Samalaṅkartā Ramāśaṅkara Tripāṭhī. [1. Saṃskaranạ]. India, Motīlāl Banārasīdāsa, 1969.

८) Simhabhūpāla. *The Rasārṇavasudhākara.* Edited by T. Venkatacharya, The Adyar Library and Research Centre 1979.

९) Tripathi, R. S. *The Daśarūpaka of Dhañjaya with Avaloka of Dhanika.* Varanasi, Viswavidyalaya Prakashan.

१०) Vaidya, P. L. *Madhyamaka Sāstra of Nāgārjuna with the Commentary Prasannapadā by Candrakīrti.* The Mithila Institute of Post-Graduate Studies and Research in Sanskrit, 1960.

११) भरतमुनिः. *नाट्यशास्त्रम् अभिनवगुप्तप्रणीताभिनवभारतीसहितम्* – *तस्य प्रथमो भागः*, साहित्याचार्यमधुसूदनशास्त्रिभिः संपादितम्, काशीहिन्दूविश्वविद्यालयः.

१२) विद्यानाथः. प्रतापरुद्रयशोभूषणं श्रीमल्लिनाथसुतकुमारस्वामिविरचितरत्नाप णाख्यटीकया समेतम्, संशोधितं प्राणशंकरसूनुना कमलाशंकरेण, १, मुम्बापुरीस्थराजकीयग्रन्थमाला, १९ श्लोकः.

१३) श्रीमदप्पय्यदीक्षितप्रणीतः कुवलयानन्दः जयदेवविरचितचन्द्रालोकव्याख्यारूपः चन्द्रालोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्ययालंकृतः. ३, तुकाराम जावजी निर्णयसागराख्यमुद्रणयन्त्रालयाधिप.

## About the Author



**Ms. Kamakshi Ramanarayanan**, has completed BA in Sastri and MA in Acharya from the Saṃskṛta Sāhitya Śāstra from the National Sanskrit University, Tirupati (erstwhile Rashtriya Samskrta Vidyapeetha, Tirupati). She is studying kāvyas and Sāhitya Śāstra under Smt. Visalakshi Sankaran and Smt. P.R. Gayathri. Presently, she is pursuing for PhD in the Vedic Science at Sri Vidya International University through Arudhra Education and Research Foundation.

# Veda Samskruti Samiti



13-1-62 & 13-1-47/1
Veenapani Nagar, Malkajgiri
HYDERABAD Telangana

Veda Samskruti is an inherent intellectual property of Bhaarata dEsham. It is the basic duty and right of every citizen in Bhaarata dEsham to protect this Intellectual property. Indian Constitution and Law provides provision for protection and preservation of its culture, its monuments, architecture etc.

The Chaturvedas said to have 1131 shaakhaas right up to the time of Aadi Shankaraachaarya and thereafter during last more than ten centuries, many shaakhaas are out of practice due to various reasons and presently only seven shaakaas are in the practice of Guru shiShya parampara.

There is a need to continuously preserve these available shaakhaas which may likely to disappear in future due to various external forces acting in the country vigorously with the power of money and global politics. It is time for the intellectuals of Bharata dEsham to wake-up and work collectively to protect and preserve Veda Samskruti of Bharata dEsham, by empowering the Youth of Bharat dEsham, the future care takers of this great Indian Heritage , with suitable education of our correct history and culture.

The above background lead to formation of this Veda Samskruti Samiti which is registered under Societies acts of Government of Telangana, with Regd. No. 961/2016 by Sri A.H. Prabhakara Rao, who is the Founder and President of the Samiti.

The **vEda vaaNee** e-journal, ISSN 2583-9020, is now publishing its **Volume 2, Issue 2, July 2024.**